लघुसिद्धान्तकौमुदी

समासप्रकरणम्

अव्ययीभावसमासः ०५

अव्ययीभावे समासान्ताः



येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥
नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥



ग्रन्थपठनम्

अथाव्ययीभावः

अव्ययीभावः २ । १ । ५ ॥

अधिकारोऽयं प्राक् तत्पुरुषात् ॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु २ । १ । ६ ॥

विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः । प्रायेणाविग्रहो नित्यसमासः । [५]प्रायेणास्वपदविग्रहो वा । विभक्तौ, हरि ङि अधि[६] इति स्थिते ॥

[1]प्रथमानिर्दिष्टं समास उपसर्जनम् १ । २ । ४३ ॥

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ॥

उपसर्जनं पूर्वम् २ । २ । ३० ॥

समासे उपसर्जनं प्राक्प्रयोज्यम् । इत्यघेः प्राक् प्रयोगः । सुपो लुक् । एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः । अव्ययीभावश्चेत्यव्ययत्वात्सुपो लुक् । [2]अधिहरि ॥

अव्ययीभावश्च २ । ४ । १८ ॥

अयं नपुंसकं स्यात् ॥

नाव्ययीभावादतोऽम्त्वपञ्चम्याः २ । ४ । ८३ ॥

अदन्तादव्ययीभावात्सुपो न लुक्, तस्य पञ्चमीं विना अमा-
देशश्च स्यात् ॥ गाः पातीति गोपास्तस्मिन्नित्यधिगोपम् ॥

तृतीयासप्तम्योर्बहुलम् २ । ४ । ८४ ॥

अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात्। अधिगोपम्, अधिगोपेन, अधिगोपे वा। [1]कृष्णस्य समीपम् उपकृष्णम्। [2]मद्राणां समृद्धिः सुमद्रम्। यवनानां व्यृ[3]द्धिर्दुर्यवनम्। [4]मक्षिकाणामभावो निर्मक्षिकम्। [5]हिमस्यात्ययोऽतिहिमम्। [6]निद्रा संप्रति न युज्यत इत्यतिनिद्रम्। [7]हरिशब्दस्य प्रकाश इतिहरि। [8]विष्णोः पश्चादनुविष्णु। योग्यतावीप्सापदार्थानिति-वृत्तिसादृश्यानि यथार्थाः। [9]रूपस्य योग्यमनुरूपम्। [10]अर्थमर्थं प्रति प्रत्यर्थम्। [11]शक्तिमनतिक्रम्य यथाशक्ति॥

अव्ययीभावे चाकाले ६ । ३ । ८१ ॥

सहस्य सः स्यादव्ययीभावे न तु काले । [१२]हरेः सादृश्यं सहरि । [१३]ज्येष्ठस्यानुपूर्वेणेत्यनुज्येष्ठम् । [१४]चक्रेण युगपत् सचक्रम् । [१५]सदृशः सख्या ससखि । [१६]क्षत्राणां संपत्तिः सक्षत्रम् । [१७]तृणमप्यपरित्यज्य सतृणमत्ति । [१८]अग्निग्रन्थपर्यन्तमधीते साग्नि ॥

प्रति

अव्ययीभावे चाकाले ६ । ३ । ८१ ॥

सहस्य सः स्यादव्ययीभावे न तु काले । [१२]हरेः सादृश्यं सहरि । [१३]ज्येष्ठस्यानुपूर्वेणेत्यनुज्येष्ठम् । [१४]चक्रेण युगपत् सचक्रम् । [१५]सदृशः सख्या ससखि । [१६]क्षत्राणां संपत्तिः सक्षत्रम् । [१७]तृणमप्यपरित्यज्य सतृणमत्ति । [१८]अग्निग्रन्थपर्यन्तमधीते साग्नि ॥

नदीभिश्च २ । १ । २० ॥

नदीभिः सह संख्या समस्यते । (समाहारे चायमिष्यते) । [१]पञ्चगङ्गम् । [२]द्वियमुनम् ॥

अस्मिन् पाठे

- समासान्तप्रत्ययानां परिचयः
- अव्ययीभावे समासान्ताः

११९) तद्धिताः (४.१.७६)

- तद्धिताः (१.३)
- अधिकारसूत्रम् – तद्धितसंज्ञा
- आपञ्चमसमाप्तेरधिकारोऽयम् ।
- तद्धिताधिकारः – ४.१.७६ – ५.४.१६०

समासान्ताः (५.४.६८)

- समासान्ताः (१.३)
- अधिकारसूत्रम् – समासान्तप्रत्ययाः
- अधिकारोऽयम् ।
- समासान्ताधिकारः – ५.४.६८ – ५.४.१६०
- आपादपरिसमाप्तेः ये प्रत्ययाः विहिताः ते समासान्तावयवा एकदेशाः भवन्ति, तद्ग्रहणेन गृह्यन्ते इति वेदितव्यम् ।

१२०) अव्ययीभावे शरत्प्रभृतिभ्यः (५.४.१०७)

- अव्ययीभावे (७.१), शरत्प्रभृतिभ्यः (५.३) [टच् (१.१), समासान्ताः (१.३), तद्धिताः (१.३)]
- विधिसूत्रम् – टच्-समासान्तप्रत्ययस्य विधानम्
- शरदादिभ्यः टच् स्यात् समासान्तः अव्ययीभावे।
- शरदः समीपमुपशरदम्। प्रतिविपाशम्। ("जराया जरश्च")। उपजरसमित्यादि॥

शरदादिगणः

- शरद् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । विश् । चेतस् । चतुर् । त्यद् । तद् । यद् । कियत् । (ग) जरायाः जरस् च । (ग) प्रतिपरसमनुभ्योऽक्ष्णः ॥
- शरदः समीपम् उपशरदम् ।

शरदः समीपम् = उपशरदम्

- शरद् ङस् उप ["अव्ययं विभक्ति..." २.१.५ इति अव्ययीभावसमासः]
- शरद् उप ["सुपो धातुप्रातिपदिकयोः" २.४.७१ इति सुब्लुक्]
- उप शरद् ["उपसर्जनं पूर्वम्" २.२.३० इति पूर्वनिपातः]
- उप शरद् टच् ["अव्ययीभावे शरत्प्रभृतिभ्यः" (५.४.१०७) इति टच् समासान्तः]
- उप शरद् अ ["चुटू" (१.३.७), "हलन्त्यम्" (१.३.३), "तस्य लोपः" (१.३.९)]
- उपशरद सुँ ["स्वौजस्..." ४.१.२ इति सुप्रत्ययः]
- उपशरद अम् ["नाव्ययीभावात्..." २.४.८३ इति सोः अमादेशः]
- उपशरदम् ["अमि पूर्वः" ६.१.१०७ इति पूर्वरूपम्]

गणसूत्रम्

- (ग) जरायाः जरस् च ।
- अव्ययीभावे जरा-शब्दस्य टच् समासान्तः भवति, जरायाः जरसादेशः च ।
- जरायाः समीपम् उपजरसम् ।

जरायाः समीपम् = उपजरसम्

- जरा ङस् उप ["अव्ययं विभक्ति..." २.१.५ इति अव्ययीभावसमासः]
- जरा उप ["सुपो धातुप्रातिपदिकयोः" २.४.७१ इति सुब्लुक्]
- उप जरा ["उपसर्जनं पूर्वम्" २.२.३० इति पूर्वनिपातः]
- उप जरा अ (टच्) ["अव्ययीभावे शरत्प्रभृतिभ्यः" (५.४.१०७) इति टच् समासान्तः]
- उप जरस् अ ["अव्ययी.." (५.४.१०७), "जराया जरश्च" (ग) इति टच् समासान्तः]
- उपजरस सुँ ["स्वौजस्..." ४.१.२ इति सुप्रत्ययः]
- उपजरस अम् ["नाव्ययीभावात्..." २.४.८३ इति सोः अमादेशः]
- उपजरसम् ["अमि पूर्वः" ६.१.१०७ इति पूर्वरूपम्]

१२१) अनश्च (५.४.१०८)

- अनः (५.१), च (अ०) [अव्ययीभावे (७.१), टच् (१.१), समासान्ताः (१.३), तद्धिताः (१.३)]
- विधिसूत्रम् – टच्-समासान्तप्रत्ययस्य विधानम्
- अन्नन्ताद् अव्ययीभावात् टच् स्यात्॥
- राज्ञः समीपम् – उपराजन् अ

१२२) नस्तद्धिते॥ ६.४.१४४

- नः (६.१), तद्धिते (७.१) [टेः (६.१), लोपः (१.१), भस्य (६.१)]
- विधिसूत्रम् – टिलोपः
- “अचोऽन्त्यादि टि” (१.१.६४), “यचि भम्” (१.४.१८)
- नान्तस्य भस्य टेः लोपः तद्धिते ।
- उपराजम्। अध्यात्मम्॥

राज्ञः समीपम् = उपराजम्

- राजन् ङस् उप ["अव्ययं विभक्ति..." २.१.५ इति अव्ययीभावसमासः]
- राजन् उप ["सुपो धातुप्रातिपदिकयोः" २.४.७१ इति सुब्लुक्]
- उप राजन् ["उपसर्जनं पूर्वम्" २.२.३० इति पूर्वनिपातः]
- उप राजन् अ (टच्) ["अनश्च" (५.४.१०७) इति टच् समासान्तः]
- उप राज् अ ["नस्तद्धिते" (६.४.१४४), इति टिलोपः]
- उपराज सुँ ["स्वौजस्..." ४.१.२ इति सुप्रत्ययः]
- उपराज अम् ["नाव्ययीभावात्..." २.४.८३ इति सोः अमादेशः]
- उपराजम् ["अमि पूर्वः" ६.१.१०७ इति पूर्वरूपम्]

१२३) नपुंसकादन्यतरस्याम्॥ ५.४.१०९

- नपुंसकात् (५.१), अन्यतरस्याम् (७.१) [अनः (५.१), अव्ययीभावे (७.१), टच् (१.१), समासान्ताः (१.३), तद्धिताः (१.३)]
- विधिसूत्रम् – टच्-समासान्तप्रत्ययस्य विधानम्
- अन्नन्तं यत् क्लीबं तदन्तादव्ययीभावात् टच् वा स्यात्।
- उपचर्मम् / उपचर्म ॥

चर्मणः समीपम् – उपचर्मम् / उपचर्म

- उपचर्मन्
  - टच्-पक्षे – उपचर्मन् अ
    - उपचर्म् अ ["नस्तद्धिते" (६.४.१४४), इति टिलोपः]
    - उपचर्मम्
  - टजभावे – उपचर्मन् सु
    - उपचर्मन् ["हल्ङ्याब्भ्यो..." ६.१.६८ इति सुलोपः]
    - उपचर्म ["नलोपः प्रातिपदिकान्तस्य" ८.२.७ इति नलोपः]

१२४) झयः॥ ५.४.१११

- झयः (५.१) [अन्यतरस्याम् (७.१), अव्ययीभावे (७.१), टच् (१.१), समासान्ताः (१.३), तद्धिताः (१.३)]
- विधिसूत्रम् – टच्-समासान्तप्रत्ययस्य विधानम्
- झयन्तादव्ययीभावात् टच् वा स्यात् ।
- उपसमिधम् / उपसमित् ॥

सङ्क्षेपः

- अव्ययीभावे समासान्ताः – टच्-प्रत्ययः
- १२०) अव्ययीभावे शरत्प्रभृतिभ्यः॥ - शरदादिगणे पठितेभ्यः शब्देभ्यः नित्यं टच्
- १२१) अनश्च॥ - अन्नन्तात् पुं-स्त्रीलिङ्गात् नित्यं टच्
- १२३) नपुंसकादन्यतरस्याम्॥ - अन्नन्तात् नपुंसकात् वा टच्
- १२४) झयः॥ - झयन्तात् वा टच्

अभ्यासप्रश्नाः – लेखनम् / विवरणम्

- समासान्तः नाम कः? सोदाहरणं विवृणुत ।
- अनश्च – सूत्रं सोदाहरणं व्याख्यात ।
- अन्नन्तात् अव्ययीभावात् कः समासान्तः भवति? सप्रमाणं निरूपयत ।
- अव्ययीभावसमासे समासान्तप्रत्ययान् सोदाहरणं निरूपयत ।

अभ्यासप्रश्नाः - अवगमनम्

- मनसि
- हिमवतः समीपम्
- वाक् सम्प्रति न युज्यते
- धाम्नि
- आत्मानम् आत्मानं प्रति
- गुणिनाम् अभावः
- मरीचिकामपि अपरित्यज्य
- कर्मणः योग्यम्

vyoma
॥ वाचं धेनुमुपासीत ॥
Samskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.